॥ अथ प्रथमोऽध्यायः ॥ Chapter-1

नमस्[1]त्रिभुवनांभोज बोध[2]मीलित हेतवे ।
विश्वरूपाय शुद्धाय नमः श्रीवत्सधारिणे ॥ १

श्री स्कंद उवाच - देवदेव पुनर्ब्रूहि, भूभागं किंचिदुत्तमम् ।
यत्र ब्रह्मादयो देवा वसिष्ठाद्यास्तपोधनाः ॥ २
प्रभासादीनि तीर्थानि गंगाद्याः सरितस्तथा ।
ऋषयः पितरो यक्षा गंधर्वा[3]प्सर-सस्तथा ॥ ३
क्रीडन्ति मातरः सर्वाः कुमारैः सह यत्र च ।
यत्र दर्शेन हव्येन सद्य[4]स्तुष्यन्ति देवता ॥ ४
कव्येन पितरस्तृप्तिं लभंते प्रपितामहाः ।
यत्र क्रीडति[5] गोविन्दः श्रिया साक[6]मलंकृतः ॥ ५
सावित्र्या ब्रह्मजानाथः शैलपुत्र्या सम्भवः[7] ।
एतद्विस्तरतो ब्रूहि यदि तुष्टोऽसि धूर्जटे[8] ॥ ६
इत्याकर्ण्य वचस्तस्य[9] कुमारस्य महेश्वरः[10] ।
मीलिताक्षः क्षणं ध्यात्वा कुमारमिदमब्रवीत् ॥ ७

श्रीमहादेव उवाच - साधु[11] पृष्टं त्वया वत्स भागं श्रेयस्करं भुवः ।
प्रवक्ष्यामि यथा तत्त्वं शृणुष्व गदतो मम ॥ ८
यौवना[12]श्वस्य नृपते ब्रह्मपुत्रो[13] यथाऽब्रवीत् ।
अयोध्या[14]धिपतिः श्रीमा[15]नासीदतुलविक्रमः ॥ ९

--

१६-श्री गणेशायनमः पुरापुराणिणारोपैः पुराणपुरतो रोयउणगभिपुर्शिगण
नःथैर्कं ज्यत्स्यः ॥

--

१- बी १ त
२- बी मीलक
३- बी गंधर्वाप्सरसस्तथा ।
४- बी सदातुष्यंतिदेवता :
५ - बी श्रीमांगोविंदः श्र(१)ससंभव ?
६ - बी श्रियाऽलंकृत :
७ - बी वानु (३) सम्भावान
८ - बी टाः
९ - बी स्य
१० - बी - रूप महेश्वर
११ - बी - सत्पथु
१२ - बी - प्रौ - इ - योवनाश्वस्य
१३ बी - कृष्णा
१४ - इ - अयोध्यापतिः
१५ - इ - श्रीमाला

यौवनाश्वसुतो[१४] राजा[१६] मांधातेति श्रुतो[१५] भुवि ।
समुद्रमेखलामुर्वी यः शशास[१७] कुलैकवत् ॥ १०

तस्मिन् शासति धर्मज्ञे[१८] प्रजाः पुत्रानिवौरसान्[१९] ।
दृष्टुं समागतस्तत्र[२०] वशिष्टस्सह भार्यया ॥ ११

तमेवंभूतले[२० अ]दृष्टा महीमंडलमध्यगम् ।
सीमंतमिव[२० बी] कुर्वाणं दिवि[२१] मानुमिवोदितं[२२] ॥ १२

अभ्युत्थानविधिं कर्तुं दूरान्नृपतिरभ्ययात् ।
समानसुभटामात्य[२३]कुमारान्तः पुरैस्सह ॥ १३

तमर्घ्यादिभिरभ्यर्च्य ककुस्थकुलदैवतम् ।
प्राविश्यच्चो[२४]निजं वेश्म शारदांबुजसंन्निभम् ॥ १४

तत्र दर्भासनासीने[२५] यथाविधि मुनीश्वरे ।
उपेत्य[२५(१)]विविशुः सर्वे सचिवाः[२५(२)] सहपार्थिवाः[२५(३)] ।

प्रणिपत्य महीपालः[२६] कृतांजलिर[२६(१)] थाब्रवीत् ॥ १५

मांधातोवाच- स्वागतं ते मुनि श्रेष्ठ सफलं[२७] मेऽद्य जीवितम् ।
अद्य[२८] नः सफलो धर्म[२८(१)]स्त्वयि[(१)]प्राप्ते गृहं गुरौ ॥ १६

--------------------

ई बी १४ - यु, १५-बी वि:, १६- बी नास्ति १७- बी सं, १८- बी नास्ति
१९-बी- वौ, २०- ई बी दृष्टाभागादेवमुनिर्वशिष्टः, २०-ई- तमेवंभूतलेदृष्टा ई
तमेवोणितलेदृष्ट्रा, २०-(२) ई समुमातिमिवकुर्वाणा, २०-ई(२) सीमंतमिवकुर्वाणांदिवो
२१-बी - दों, बी-२२ त:, २३-बी त सामात, २४-ई बी च्च, २५-ई बी
सत्तणाजा, २६-बी कुंपि, २७- ई बी सफलंजीवतंमम, २८-ई बी अध्ययन: सफला
लक्ष्मी: अद्यन: सफलंकुलं, २८- ई(१) अध्यन: सफलोधर्म:। त्वयिप्राप्तेगृहानुगुरौ
२५-ई (१) विश्र २५-ई(२) संचिवोसह २५-ई(३) पार्थिवा
२६-ई(१) महीपालहृपीतांजलि । २७ ई बी- सफलंजीवतं मम
२८ बी अध्यन: सफला लक्ष्मी: अद्यन: सफलं कुलं
२८ ई अद्यन: सफलो धर्म:। त्वयिप्राप्ते गृहानुगुरो
(अतिरिक्त पाठ:)

ई(१) तवयि

संसारममतावर्ते परिभ्रांतस्य देहिन : ।
भवंति त्वद्विधा, ब्रह्मन्नवलंबनयष्टय: ॥ १७

अन्य: सुहृता केचित्क्व चित्त्वां मं तपस्सु च ।
क्वचित्तुर्ष्यन्ति मुनयस्तपोधन तपोवने ॥ १८

रता वनविहारेषुप्रीयमाणा: परस्परम् ।
विपद: श्वपदे: कच्चिन्नाप्नुवंति कुतस्तव ॥ १९

कुलवर्त्सकामा स्ते क्वचिन्मुनिकुमारिका : ।
वयोनुरूपै: क्लाशैरभिषिचंति किंशुनम् ॥ २०

वितत्यमानैर्वे तात कर्मणि क्वचिदाश्रमे ।
रक्षांसि नापराध्यंति तुभ्यं वा शमिनां वर ॥ २१

क्वचित् कल्पायुकल्याणी सबला कामधुक् तव ।
यस्याहरणानिर्बंधो ययौ गोधयवंधुताम् ॥ २२

किं वा जयंति माग्यानि मम श्रयेन मुनीश्वर ।
प्राप्नरसाधर्मैधत्या चन्द्रश्चंद्रिकया यथा ॥ २३

यत: प्राप्तोऽसि भगवन्प्रदेशान्मुनिवत्सल ।
तन्निवेद्य मे सर्व श्रवणार्होऽस्मि चेन्मुने ॥ २४

---------

२६-बी ममतुशाय, ३०-बी कू , ३१-बी वस्कृत:, इ-तवसुत?, ३२-ई ष्यं श ३२(१) कच्चित्, बी ३३, ३३-ई(१) विहारेषुप्रायमाणा:, ३४-ई-बी स्पापदे ए-श्वपदा:क ३४-ई कुतस्तन:, ३५-ई बी र , ३६-ई बी कुशलैरभिषिंचतिकिशुकान्, ३६-ए किंशुनाम् , ३७-ई-बी- वितत्पमात्-वैताने, ३७- ई(१) क , ३८-ई बी नानासना , ३९-ई-बी व , ३९-(१)ई र:, ३९-(२) ई- कच्चिच्च कल्पाकल्पाणि, ४०-बी ई- पं, ४०प(१)ई श ४१-बी ई त्प: ४१(२) ई क्या, ४१(३)ई त ए प्राप्तो, ४१(४) ई- भगवान् प्रदेशा, ४१-(५) वत्सलात्

वसिष्ठउवाच:- विष्णुवत्त्वयि चक्रेण पृथिवीमनुशासति ।
सर्वत: कुशलं राजन्‌ यतीनां गृहिणीनामपि ।। २५

स्थानादागमनं यस्मादस्माकमथ पृच्छसि ।
श्रूयतां[४२] राजशार्दूल यदि कौतूहलं[४३] हि ते ।। २६

अर्बुदारण्यमतुलं तीर्थकोटिसमन्वितम्‌ ।
श्रुतं यदि भवेत्‌[४४] पृथिव्यां पावनं परम्‌ ।। २८

अस्ति तत्राश्रमोऽस्माकं, नानामुनिजनप्रिय: ।
तत्र[४५] तीर्थविगाहाय प्राप्ता:[४६] सप्तर्षयोऽमला: ।।२९

तत्र तीर्थानि सर्वाणि तै: विगाह्य समंतत: ।
अहमभ्यर्थितो राजन्‌ शेष तीर्थविगाहने ।। ३०

ततोऽहं[४६ (१)] मुनिभिस्सार्धं सौगंधिकगिरिं[४७] प्रति ।
ययौ साधैर्वृतस्त्या कृष्णाभिर्ब्रह्मवादिभि: ।। ३१

कृततीर्थविगाहानां मुनीनां भवितात्मनाम्‌[४७ (१)] ।
भूर्भुवेश्वरदेवस्य[४८] प्रासादे[४९] स्थितिशालिनाम्‌ ।। ३२

अर्व चकार विधिवत्तीर्थयात्रागतो नृप: ।
सोमवंशोद्भव:[४९ (१)] श्रीमान्‌ शत्रुजिन्नामविश्रुत: ।। ३३

तस्याशिष: परा दत्वा तत्रासीना द्विजोत्तमा: ।
कथयांचक्रिरे राजन्‌ वाष्पविह्वलितेक्षणा: ।। ३४

---

४२- ई बी राजशार्दूल:, ४३- ई बी- तत्, ४४- ई बी [illegible] थ, ४५-ई बी त्रा

४६- बी प्राप्ता: सप्तमलातत्रतीर्थानिसर्वाविगाह्य, ४६-(१) ततोहमुनिभि:, [illegible] ४७-ई-(१) भा

[illegible] सार्धसौगंध, ४८- ई बी- भुवनेश्वर, ४९-बी प्राप्तादेस्निवीशालिना

४९-(१) ई- सोमवंसो ।

ए (१) गृहीणामपि
ए (२) तीर्थानि
ए (३) विन्हिक्तेक्षणा:

अथाजगाम[५२] देवर्षि नारदस्सहपर्वत:[५३] ।
कृतप्रणामो भगवान् स तत्रास्माभिरादृरः[५४] ।
उवाच परमप्रीतो[५५] ब्रह्मपुत्रो विशांपते ।। ३५

नारद उवाच- आगच्छन्तु मुनिश्रेष्ठा गच्छामो गौतमाश्रमम् ।।
इतो, वं नातिदूरेऽस्ति पुण्यद: सर्वदा नृणाम् ।
तीर्थैतिमसमो[५६]वासा सर्वदेवमय: शुचि:[५७] ।
गौतमस्याश्रमो नाम पुष्पादिफलसंयुत[५८] ।। ३७

य:[५९] प्रसादेन पद्मायाः पंच-क्रोशप्रमाणात: ।
श्रीमालक्षेत्रमित्यस्ति[५९(१)] विश्रुतं भूप भूतले ।। ३८

तत्र तीर्थानि भूयांसितदागच्छत[५९(२)] पश्यत ।।

वसिष्ठउवाच :- इत्युक्ष्विवचनंश्रुत्वा वयं सम्प्रणयी नृप ।
मुदिता व्योममार्गेण गौतमाश्रमभागता:[श्रम] ।। ४०

संगम्य मुनिना सर्वे श्रुत्वानंदपुरस्कृता: ।
श्रीमात्संज्ञितं[५९(३)] क्षेत्र तदद्भुततमं भुवि ।। ४१

विगाह्य सुचिरं कालं स्नात्वा पीत्वा च सर्वत: ।
यथास्थानं ययु: सर्वे मुनयो दीर्घदर्शिन:[(५९(४))] ।। ४२

---

५२- ई बी- मैं, ५३- बी ई- दाक, ५४- ई बी- वृते, ५५-बी- प्रीती, ५६-ई बी -मा
५७- ई बी - श्रुति, ५८- ई बी फलपुष्प, ५९-ई बी - य:, ५९-(२१)ए इत्युष्णिवचनं,
५९-बी(३) संज्ञितां, ५९- ई(१) मित्यासाद्विश्रुतं, ५९- ई(२) सितदागन्तृतपश्यक्त,
५९-ई(४) स्थानंययुसर्व:, ५९- ई(५) दर्शिनं -

५९ ए (१) श्रीमाल क्षेत्र
५९ ए (२) भूयांसि
५९ ए (३) क्षेत्रम्

गौतमानुज्ञया राजन्नरुंधत्यान्वितो ह्यहम्[६०] ।
चिरात् त्वद्दर्शनाकांक्षी[५७], हर्षादिह, समागतः ।। ४३

तद्गौतमतपस्तोमनिर्धूतकलुषं[६१], पुरा ।
वरदानैः श्रियः पश्चात् चात्रै श्रीमालमुच्यते ।। ४४

इति श्री स्कंदपुराणे एकाशीति साहस्र्यां संहितायां
ब्राह्म्य विभागेतृतीय परिच्छेदे श्रीमाल महात्मये वशिष्टागमनं
नाम प्रथमोऽध्यायः ।। १ ।।

---

ई बी ६० अरुंधत्यान्वितोहं
बी ६१ हू

ए तपपस्तोमनिर्धूत ई तपस्तोम निर्धूत

ए (१) ञ